चतुर्थः पाठः

# संस्कृतसाहित्ये लेखिकाः

BSOL PATNA

[ समाजस्य यानं पुरुषैः नारीभिश्च चलति । साहित्येऽपि उभयोः समानं महत्त्वम्। अधुना सर्वभाषासु साहित्यरचनायां स्त्रियोऽपि तत्पराः सन्ति यशश्च लभन्ते। संस्कृतसाहित्ये प्राचीनकालादेव साहित्यसमृद्धौ योगदानं न्यूनाधिकं प्राप्यते। पाठेऽस्मिन्नतिप्रसिद्धानां लेखिकानामेव चर्चा वर्तते येन साहित्यनिधिपूरणे तासां योगदानं ज्ञायेत। ]

विपुलं संस्कृतसाहित्यं विभिन्नैः कविभिः शास्त्रकारैश्च संवर्धितम्। वैदिककालादारभ्य शास्त्राणां काव्यानाञ्च रचने संरक्षणे च यथा पुरुषाः दत्तचित्ताः अभवन् तथैव स्त्रियोऽपि दत्तावधानाः प्राप्यन्ते। वैदिकयुगे मन्त्राणां दर्शका न केवला ऋषयः, प्रत्युत ऋषिका अपि सन्ति। ऋग्वेदे चतुर्विंशतिरथर्ववेदे च पञ्च ऋषिकाः मन्त्रदर्शनवत्यो निर्दिश्यन्ते यथा-यमी, अपाला, उर्वशी, इन्द्राणी, वागाम्भृणी इत्यादयः।

बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य पत्नी मैत्रेयी दार्शनिकरुचिमती वर्णिता यां याज्ञवल्क्य आत्मतत्त्वं शिक्षयति। जनकस्य सभायां शास्त्रार्थकुशला गार्गी वाचक्नवी तिष्ठति स्म। महाभारतेऽपि जीवनपर्यन्तं वेदान्तानुशीलनपरायाः सुलभायाः वर्णनं लभ्यते।

लौकिकसंस्कृतसाहित्ये प्रायेण चत्वारिंशत्कवयित्रीणां सार्धशतं पद्यानि स्फुटरूपेण इतस्ततो लभ्यन्ते। तासु विजयाङ्का प्रथम-कल्पा वर्तते। सा च श्यामवर्णासीदिति पद्येनानेन स्फुटीभवति-

नीलोत्पलदलश्यामां विजयाङ्कामजानता ।
वृथैव दण्डिना प्रोक्ता 'सर्वशुक्ला सरस्वती' ॥

तस्याः कालः अष्टमशतकमित्यनुमीयते। चालुक्यवंशीयस्य चन्द्रादित्यस्य राज्ञी विजयभट्टारिकैव विजयाङ्का इति बहवो मन्यते। किञ्च शीला भट्टारिका, देवकुमारिका, रामभद्राम्बा-प्रभृतयो दक्षिणभारतीयाः संस्कृतलेखिकाः स्वस्फुटपद्यैः प्रसिद्धाः।

विजयनगरराज्यस्य नरेशाः संस्कृतभाषासंरक्षणाय कृतप्रयासा आसन्निति विदितमेव। तेषामन्तःपुरेऽपि संस्कृतरचनाकुशलाः राज्ञ्योऽभवन्। कम्पणरायस्य (चतुर्दशशतकम्) राज्ञी गङ्गादेवी 'मधुराविजयम्' इति महाकाव्यं स्वस्वामिनो (मदुरै)-विजयघटनामाश्रित्यारचयत्। तत्रालङ्काराणां संनिवेशः आवर्जको वर्तते। तस्मिन्नेव राज्ये षोडशशतके शासनं कुर्वतः अच्युतरायस्य राज्ञी तिरुमलाम्बा वरदाम्बिकापरिणय-नामकं प्रौढं चम्पूकाव्यमरचयत्। तत्र संस्कृतगद्यस्य छटा समस्तपदावल्या ललितपदविन्यासेन चातीव शोभते। संस्कृतसाहित्ये प्रयुक्तं दीर्घतमं समस्तपदमपि तत्रैव लभ्यते।

आधुनिककाले संस्कृतलेखिकासु पण्डिता क्षमाराव (1890-1953 ई०) नामधेया विदुषी अतीव प्रसिद्धा। तया स्वपितुः शंकरपाण्डुरंगपण्डितस्य महतो विदुषो जीवनचरितं 'शङ्करचरितम्' इति रचितम्। गान्धिदर्शनप्रभाविता सा सत्याग्रहगीता, मीरालहरी, कथामुक्तावली, विचित्रपरिषद्यात्रा, ग्रामज्योतिः इत्यादीन् अनेकान् गद्य-पद्यग्रन्थान् प्रणीतवती। वर्तमानकाले लेखनरतासु कवयित्रीषु पुष्पादीक्षित-वनमाला भवालकर-मिथिलेश कुमारी मिश्र-प्रभृतयोऽनुदिनं संस्कृतसाहित्यं पूरयन्ति।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| अधुना | - | अस्मिन् समये | - | इस समय |
| उभयोः | - | द्वयोः | - | दोनों का |
| लभन्ते | - | प्राप्नुवन्ति | - | प्राप्त करते हैं |
| तत्पराः | - | उत्सुकाः | - | उत्सुक रहते हैं |
| ज्ञायते | - | अवगम्यते | - | ज्ञात होता है |
| विपुलम् | - | प्रभूतम् | - | अत्यधिक |
| संवर्धितम् | - | वृद्धिम् आनीतम् | - | बढ़ाया गया |
| आरभ्य | - | उपक्रम्य | - | प्रारंभ करके |
| वैदिकयुगे | - | वेदस्य काले | - | वेद के काल में |
| ऋषयः | - | मन्त्रद्रष्टारः | - | ऋषि |

| | | | | |
|---|---|---|---|---|
| निर्दिश्यन्ते | – | उल्लिख्यन्ते | – | उल्लेखित किये जाते हैं |
| स्फुटरूपेण | – | स्पष्टरूपेण | – | स्पष्ट रूप से |
| इतस्ततः | – | अस्मात् स्थानात् तत् स्थानं प्रति | – | इधर-उधर |
| वृथैव | – | व्यर्थम् | – | बेकार |
| प्रोक्ता | – | कथिता | – | कही गयी |
| अनुमीयते | – | अनुमानं क्रियते | – | अनुमान किया जाता है |
| प्रभृतयः | – | आदयः | – | आदि |
| विदितमेव | – | ज्ञातमेव | – | ज्ञात ही है। |
| अरचयत् | – | रचनां कृतवती | – | रचना की |
| पूरयन्ति | – | पूर्तिं कुर्वन्ति | – | पूर्ण करते हैं। |

## सन्धिविच्छेदः

| | | |
|---|---|---|
| स्त्रियोऽपि | – | स्त्रियः + अपि |
| प्राचीनकालादेव | – | प्राचीनकालात् + एव |
| न्यूनाधिकम् | – | न्यून + अधिकम् |
| पाठेऽस्मिन्नतिप्रसिद्धानाम् | – | पाठे + अस्मिन् + अतिप्रसिद्धानाम् |
| दत्तावधानम् | – | दत्त + अवधानम् |
| चतुर्विंशतिरथर्ववेदे | – | चतुर्विंशतिः + अथर्ववेदे |
| बृहदारण्यकोपनिषदि | – | बृहदारण्यक + उपनिषदि |
| वेदान्तानुशीलनपरायाः | – | वेदान्त + अनुशीलनपरायाः |
| अष्टमशतकमित्यनुमीयते | – | अष्टमशतकम् + इति + अनुमीयते |

ABDIEL SOLUTIONS ABSOL PATNA

| | | |
|---|---|---|
| विजयभट्टारिकैव | - | विजयभट्टारिका + एव |
| तत्रालङ्काराणाम् | - | तत्र + अलङ्काराणाम् |
| प्रभृतयोऽनुदिनम् | - | प्रभृतयः + अनुदिनम् |
| इत्यादयः | - | इति + आदयः |
| तत्रैव | - | तत्र + एव |
| तस्मिन्नेव | - | तस्मिन् + एव |
| आसन्निति | - | आसन् + इति |
| प्रोक्ता | - | प्र + उक्ता |
| वृथैव | - | वृथा + एव |
| इतस्ततो | - | इतः + ततः |
| श्यामवर्णासीदिति | - | श्यामवर्णा + आसीत् + इति |
| काव्यानाञ्च | - | काव्यानाम् + च |
| वैदिककालादारभ्य | - | वैदिककालात् + आरभ्य |

## समासः

| | | |
|---|---|---|
| संस्कृतसाहित्ये | - | संस्कृतस्य साहित्ये (षष्ठी तत्पुरुषः) |
| प्राचीनकालात् | - | प्राचीनः चासौ कालः तस्मात् (कर्मधारयः) |
| वैदिकयुगे | - | वैदिकं तच्च युगं तस्मिन् (कर्मधारयः) |
| आत्मतत्त्वम् | - | आत्मनः तत्त्वम् (षष्ठी तत्पुरुषः) |
| स्वस्वामिनः | - | स्वस्य स्वामिनः (षष्ठी तत्पुरुषः) |
| जीवनचरितम् | - | जीवनस्य चरितम् (षष्ठी तत्पुरुषः) |
| स्वपितुः | - | स्वस्य पितुः (षष्ठी तत्पुरुषः) |

| | | |
|---|---|---|
| नीलोत्पलम् | – | नीलम् तच्च उत्पलम् (कर्मधारय:) |
| शास्त्रार्थकुशला | – | शास्त्रार्थे कुशला (सप्तमी तत्पुरुष:) |
| साहित्यनिधिपूरणे | – | साहित्यनिधे: पूरणे (षष्ठी तत्पुरुष:) |
| संस्कृतलेखिका: | – | संस्कृतस्य लेखिका: (षष्ठी तत्पुरुष:) |
| विजयनगरराज्यस्य | – | विजयनगरं नाम राज्यम्, तस्य (मध्यमपदलोपी तत्पुरुष:) |
| संस्कृतरचनाकुशला: | – | संस्कृतरचनायां कुशला: (सप्तमी तत्पुरुष:) |
| गान्धिदर्शनप्रभाविता | – | गान्धिदर्शनेन प्रभाविता (तृतीया तत्पुरुष:) |

## अभ्यास:
## ( मौखिक: )

1. एकपदेन उत्तरं वदत –

(क) विपुलं किम् अस्ति ?

(ख) विपुलं संस्कृतसाहित्यं कै: संवर्द्धितम् ?

(ग) काव्यानाम् रचने संरक्षणे च का: दत्तावधाना: ?

(घ) गङ्गादेवी किं महाकाव्यम् अरचयत् ?

(ङ) आधुनिकसंस्कृतलेखिकासु का प्रसिद्धा ?

2. पदार्थं वदत ?

(क) ''लभ्यन्ते'' इत्यस्य क: अर्थ: ?

(ख) ''इन्द्राणी'' इत्यस्य क: अर्थ: ?

(ग) ''वर्तते'' इत्यस्य क: अर्थ: ?

(घ) ''विपुलम्'' इत्यस्य क: अर्थ: ?

(ङ) ''ऋषिका'' इत्यस्य क: अर्थ: ?

ABDIEL SOLUTIONS ABSOL PATNA

## अभ्यासः
### ( लिखितः )

1. **एकपदेन उत्तरं दत्त –**

(क) कस्मिन् युगे मन्त्राणां दर्शका न केवला ऋषयः प्रत्युत ऋषिका अपि सन्ति ?

(ख) वागाम्भृणी कुत्र ऋषिका निर्दिश्यते ?

(ग) यावल्क्यस्य पत्नी का आसीत् ?

(घ) कस्य सभायां शास्त्रार्थकुशला गार्गी वाचक्नवी तिष्ठति स्म ?

(ङ) लौकिकसंस्कृतसाहित्ये चत्वारिंशत्कवयित्रीणां प्रथमकल्पा का वर्तते ?

(च) लौकिकसंस्कृतसाहित्ये कियतीनां कवयित्रीणां वर्णनं लभ्यते ?

(छ) विजयभट्टारिका कस्य राज्ञी आसीत् ?

2. **अधोलिखितानि रिक्तस्थानानि पूरयत -**

(क) बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य पत्नी ..................... वर्णिता।

(ख) जनकस्य सभायां शास्त्रार्थकुशला ..................... वाचक्नवी तिष्ठति स्म।

(ग) लौकिकसंस्कृतसाहित्ये प्रायेण ..................... कवयित्रीणां सार्धशतं पद्यानि लभ्यन्ते।

(घ) तासु ..................... प्रथमकल्पा वर्तते।

(ङ) सा च ..................... वर्णासीदिति।

(च) चन्द्रादित्यस्य राज्ञी ..................... एव विजयाङ्का इति मन्यन्ते।

(छ) षोडशशतके अच्युतरायस्य राज्ञी तिरुमलाम्बा ..................... नामक प्रौढं चम्पूकाव्यम् अरचयत्।

3. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन संस्कृतभाषया दत्त -

(क) ऋग्वेदे कति ऋषिकाः मन्त्रदर्शनवत्यो निर्दिश्यन्ते ?

(ख) याज्ञवल्क्यस्य पत्नी केन रूपेण वर्णिता ?

(ग) याज्ञवल्क्यः तां किं शिक्षयति ?

(घ) विजयाङ्कायाः वर्णः कः आसीत् ?

(ङ) तिरुमलाम्बा कस्य चम्पूकाव्यस्य रचनां कृतवती ?

(च) शङ्करचरितम् इति जीवनचरितस्य रचयित्री का ?

4. उदाहरणानुसारं पर्यायवाचिपदानि लिखत -

उदाहरणम् - प्रश्नः - 'विशालम्' इत्यस्य पर्यायपदम् किम् ?

'विशालम्' इत्यस्य ''विपुलम्'' पर्यायपदम्

प्रश्नाः

(क) वृथा इत्यस्य .................. पर्यायपदम्।

(ख) तत्पराः इत्यस्य .................. पर्यायपदम्।

(ग) वर्तते इत्यस्य .................. पर्यायपदम्।

(घ) ख्याताः इत्यस्य .................. पर्यायपदम्।

(ङ) ज्ञातमेव इत्यस्य .................. पर्यायपदम्।

(च) भार्या इत्यस्य .................. पर्यायपदम्।

(छ) जननी इत्यस्य .................. पर्यायपदम्।

5. अधोलिखितैःपदैः वाक्यानि रचयत -

(क) सभायाम्

(ख) प्रथमकल्पा

(ग) लभ्यते

(घ) ऋषयः

(ङ) शास्त्राणाम्

**6. उदाहरणम् अनुसृत्य स्त्रीप्रत्ययोगेनशब्दं रचयत -**

उदाहरण - कारक + टाप् - ...........................

उत्तरम् - कारिका

(क) लेखक + टाप् = ..................................।

(ख) नायक + टाप् = ..................................।

(ग) वाचक + टाप् = ..................................।

(घ) विधायक + टाप् = ..................................।

(ङ) योजक + टाप् = ..................................।

(च) धारक + टाप् = ..................................।

(छ) पालक + टाप् = ..................................।

(ज) गायक + टाप् = ..................................।

ABDIEL SOLUTIONS ABSOL * PATNA *

**7. उदाहरणम् अनुसृत्य रेखांकितपदानां स्थाने अन्यपदानि योजयत -**

उदाहरणम् - प्रश्नः-1 जनकस्य सभायां गार्गी <u>तिष्ठतिस्म</u>।

उत्तरम्-1 जनकस्य सभायां गार्गी अतिष्ठत्।

प्रश्नः- 2 ते <u>पठन्ति स्म</u>

उत्तरम्- 2 ते अपठन्

(क) बालकः प्रतिदिनं विद्यालयं <u>गच्छति स्म।</u>

(ख) छात्राः सायंकाले क्षेत्रे <u>क्रीडन्ति स्म।</u>

(ग) अध्यापकाः वर्गेषु पाठयन्ति स्म।

(घ) गजाः वने भ्रमन्ति स्म।

(ङ) कोकिलाः वृक्षशाखासु कूजन्ति स्म।

(च) वानराः तरुशिखरेषु कूर्दन्ति स्म।

## योग्यताविस्तारः

अनेन पाठेन संस्कृतसाहित्यस्य विकासे महिलानां योगदानस्य चर्चा कृता अस्ति। अस्य पाठस्य सन्देशः अयमस्ति यत् वैदिकयुगतः आधुनिकसमयं यावत् ऋषिकाः, कवयित्र्यः, लेखिकाश्च संस्कृतसाहित्यं संवर्द्धयन्त्यः सन्ति। संस्कृतलेखिकानां सुदीर्घा परम्परा वर्तते। अनुसन्धानेन तथ्यमिदं स्पष्टं भवति यत् महिला अपि पुरुषैः सह संस्कृतस्य सेवां कृतवत्यः।

## कार्यानुशीलनम्

(क) 'गीता प्रेस' गोरखपुरतः प्रकाशिते वेदकथाङ्के ऋषिकाणां वर्णनं दृश्यते। ततः तासाम् अतिरोचकं कथानकं संकलयत ।

(ख) गार्गी-मैत्रेयी-याज्ञवल्क्यानां शास्त्रीयसंवादः प्रख्यातः। तस्य संवादस्य सारांशं संस्कृतशिक्षकस्य सहयोगेन लिखत।

(ग) संस्कृतशिक्षकस्य पुस्तकालयाध्यक्षस्य च सहयोगेन पुस्तकालये संस्कृतलेखिकानां सूची करणीया, तासां रचनानां च मूलभावः लेखनीयः।

□

ABDIEL SOLUTIONS ABSOL PATNA